**Kaumodaki : Journal of Multidisciplinary Studies**
[A Peer-Reviewed, Open Access Journal; Indexed in NepJoL]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Management Cell, Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# अभिज्ञानशाकुन्तलनाटके संवादयोजना

**प्रकाशपौडेलः**
Department of Sahitya (Sanskrit Literature), Shree Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

***Article History***: *Submitted 13 Oct. 2024; Reviewed 03Nov. 2024; Accepted 13 Nov. 2024*
***Corresponding Author***: *Prakash Paudel,* ***Email***: *ppaudel15@gmail.com*
***DOI :*** *https://doi.org/10.3126/kdk.v5i1.73653*

*Copyright 2025 © the Author(s) and the Publisher*

**लेखसारः**

*प्रस्तुतालेखो महाकविना कालिदासेन विरचितस्य ‘अभिज्ञानशाकुन्तलम्’ नाटकस्य संवादविश्लेषणे केन्द्रितोऽस्ति । अत्र पौरस्त्यं नाट्यसिद्धान्तमाश्रित्य मञ्चाभिनयः, आकारः, भाषाप्रयोगः, सम्बोधनसूचकानां नाट्योक्तीनां प्रयोगः, काव्यात्मकता चेत्यादिविषयानाधारीकृत्य नाट्यसंवादस्य विश्लेषणं कृतमस्ति । गुणात्मकोऽनुसन्धानविधिरवलम्बितोऽयं लेखो वर्णनात्मक-विश्लेषणात्मकशैल्यां संरचितो वर्तते । ‘अभिज्ञानशाकुन्तल’स्य नाट्यसंवादो मञ्चीयः, नेपथ्यम्, अपवारितम्, जनान्तिकम्, सर्वश्राव्यम्, अश्राव्यम्, आकाशभाषितञ्चेत्यादीनां तत्प्रकाराणामुपप्रकाराणाञ्च यथोचित-प्रयोगात् अभिनेयतापरिवर्धितः, सङ्क्षिप्त-मध्यमाकारसंवादबहुलो वर्तते । क्वचित् क्वचित् प्रयुक्ता दीर्घाः, दीर्घतमाश्च संवादा अभिनये पूर्वान्वये च व्याघातका न दृश्यन्ते । अत्र नाट्यसिद्धान्तमनुपालयन् पात्राणां स्तरानुकूल्येन संस्कृतम्, शौरसेनी, महाराष्ट्री, मागधी चेति बहुलभाषाः, भगवन् !, राजन् !, आयुष्मान् !, आर्य !, देव !, वयस्य !, भद्रमुख !, भर्त्ता !, भट्टारक !, हला !, सखि!, अयि !, वत्स !, आवुत्त ! इत्यादयः सम्बोधनसूचिका नाट्योक्तयश्च यथौचित्यं प्रयुक्ताः सन्ति । पात्राणां बौद्धिकस्तरानुकूल्येन सुष्ठु प्रयुक्तैर्गद्यवाक्यैः, पद्यवाक्यैः, मिश्रवाक्यैश्च संरचितो नाट्यसंवादो विविधैर्रसालङ्कार-रीति-ध्वन्यादिभिः काव्यतत्त्वैर्विविधाभिः सूक्तिभिर्लोकोक्तिभिश्च मञ्जुलोऽस्ति । इत्थं नाट्यतत्त्वस्य काव्यतत्त्वस्य च दृष्ट्या उपयुक्तो वर्तते इति निष्कर्षो स्थापितोऽस्ति । निष्कर्षोऽयं सम्बद्धेभ्यः सर्वेभ्य उपयोगी भविष्यति इति अपेक्षितमस्ति ।*

**शब्दकुञ्जी :** आकाशभाषितम्, कथोपकथनम्, नाट्यम्, नियतश्राव्यम्, पात्रानुकूलम्

## विषयपरिचयः

काव्यस्य श्रव्यदृश्यत्वेन द्वौ भेदौ स्तः । तयोर्मध्ये दृश्यकाव्यान्तर्गतं नाटकमभिनेयकाव्यं विद्यते । तस्मिन् प्रतिपादनीयं सर्वमभिनयेनैव प्रतिपाद्यते । अभिनयः कायिकवाचिकाहार्यभेदेन त्रिविधो भवति । अभिनयप्रकारेषु द्वितीयो वाचिकाभिनयो वाग्व्यवहाराधारितो भवति । स नाट्यसंवादस्य कथोपकथनस्य वा माध्यमेन प्रस्तूयते । नाटककारो नाटके संवादाश्रयेणैव वस्तुविस्तरणम्, चरित्रचित्रणम्, नाट्यवस्तुनिरूपणञ्च करोति । नाटके प्रतिपादितानि वस्तुचरित्ररसध्वनिरीतिगुणनाट्यवस्त्वादीनि काव्यतत्त्वानि अभिनयकलासम्बद्धनाट्यवस्तूनि च संवादाश्रितानि भवन्ति ।

महाकविः कालिदासः संस्कृतसाहित्यस्य सुप्रसिद्धः कविर्नाटककारश्च वर्तते। तस्य काव्यकला नाट्यकला च विश्वसाहित्ये प्रशंसिता अस्ति । तत्प्रणीतानि 'विक्रमोर्वशीयम्', 'मालविकाग्निमित्रम्', 'अभिज्ञानशाकुन्तलम्' चेति त्रीणि रूपकाणि लभ्यन्ते। महाकवेर्नाटकेषु 'अभिज्ञानशाकुन्तम्' विश्वसाहित्ये सुविख्यातं नाट्यकाव्यं वर्तते। तन्नाट्यकलायाः काव्यकलायाश्च प्रयोगे समुत्कृष्टं मन्यते। तथैव नाटकमिदं संवादयोजने च उल्लेखनीयमस्ति। 'अभिज्ञानशाकुन्तल'नाटकस्य संवादयोजनाया विश्लेषणोद्देश्ययुक्ते प्रस्तुतालेखे 'अभिज्ञानशाकुन्तल'नाटके संवादयोजना कीदृशी वर्तते ? इति प्रमुखसमस्या वर्तते। तस्याः समाधानक्रमे 'अभिज्ञानशाकुन्तल'स्य संवादविश्लेषणाधारितेषु पूर्वाध्ययनेषु भाषान्तरे समुपलब्धानाम्, अनेकेषु ग्रन्थलेखरचनादिषु विकीर्णतया स्थितानाञ्च तथ्यानां पुनरीक्षणं कृतं वर्तते।

संवादविश्लेषणे पारस्परिकसाहाय्यम्, भाषणक्रमः, समयान्तरालः, संवादवक्रता, सहभागिता, नेतृत्वम्, विषयव्यवस्थापनम्, कथनयुग्मम्, सङ्कथनसारिणी, कथनविस्तारश्चेति नव आधारा आधुनिकसङ्कथनाध्येतृभिः प्रस्तुताः सन्ति (ओझा, ई. २०२२, पृ.३३)। अत्र केवलं वाचिकसंवादस्य विश्लेषणं क्रियते, विश्लेषणाधारः पूर्वीया नाट्यमान्यता गृहीता वर्तते इति लेखस्यास्य सीमा वर्तते।

## अध्ययनविधिः

प्रस्तुताध्ययने अवलम्बिता अध्ययनविधिर्यथा वर्तते -

### अध्ययनयोजना

गुणात्मकेऽस्मिन् अध्ययने कृतितः समुपलब्धानां तथ्यानां विश्लेषणेन निष्कर्षः स्थापितो विद्यते।

### निदर्शनचयनम्

कालिदासविरचितस्य 'अभिज्ञानशाकुन्तल'नाटकस्य संवादयोजनाया विश्लेषणपरके अस्मिन्नध्ययने समष्टिविधेरुपयोगेन कालिदासविरचितं समग्रं 'अभिज्ञानशाकुन्तल'नाटकं चीतमस्ति। तस्य उपलब्धेभ्यः बहुलपाठेभ्यः ज्योत्स्नासरलासंस्कृतहिन्दीव्याख्यायुक्तश्चौखम्बाकृष्णदास-अकादमीतः २०११ ईशवीयाब्दे प्रकाशितग्रन्थे स्थितः पाठो विश्लेषणे प्रयुक्तोऽस्ति।

### तथ्यसङ्कलनम्

प्रस्तुताध्ययने तथ्यानि 'अभिज्ञानशाकुन्तल'नाटकात्, तत्सम्बद्धपुस्तकपत्रिकालेखरचनाभ्यः सङ्कलितानि सन्ति।

### तथ्यसङ्कलनस्य साधनानि

प्रस्तुताध्ययने प्राथमिकद्वितीयकस्रोतसः पुस्तकपत्रिकाशोधप्रतिवेदनेषु समुपलब्धानि तथ्यानि सङ्कलितानि सन्ति।

### तथ्यविश्लेषणप्रक्रिया

प्रस्तुताध्ययने वर्णनात्मक-विश्लेषणात्मक-विधिना तथ्यविश्लेषणं कृत्वा निष्कर्षः स्थापितो वर्तते।

## पूर्वाध्ययनेक्षणम्:

'अभिज्ञानशाकुन्तलम्' अधिकृत्य विहितानि बहूनि अध्ययनानि उपलभ्यन्ते । अत्र तु तेषु प्रतिनिधिमूलकतया कानिचिदध्ययनानि एव उपस्थापितानि सन्ति।

श्यामशरणः पाण्डेयः (ई. १९०४) 'कालिदास का नाट्यकल्प' (कालिदासस्य नाट्यकल्पम्) इति विद्याविरिधिस्तरीयशोधप्रबन्धाधारिते ग्रन्थे कालिदासरचितरूपकेषु नाट्ययोजनां विवेचयन् वस्तुविन्यासविवेचनक्रमे सर्वश्राव्यादिसंवादप्रकारोपप्रकारान् तथा च भाषाशैलीविवेचनोपक्रमे सम्बोधनपदप्रयोगभाषाप्रयोगवैविध्यं वर्णयति । विवेचनमिदं कालिदासस्य त्रिषु रूपकेषु आधारितमस्ति। अत्र 'अभिज्ञानशाकुन्तल'विषयीकृतानि विवेचनानि विकीर्णतया अवस्थितानि उपलभ्यन्ते। तत्रापि संवादविवेचनं वस्तुयोजनाभाषाशैल्यादिषु विविधशीर्षकोपशीर्षकेषु विभक्तमुपलभ्यते।

वलदेव उपाध्यायः (ई. २००८) 'संस्कृत सुकवि समीक्षा' (संस्कृतसुकवीनां समीक्षा) इति ग्रन्थे एवमेव 'अभिज्ञानशाकुन्तल'नाटकस्य भूमिकाखण्डे हिन्दीव्याख्याकारः कृष्णमणिस्त्रिपाठी (ई २०१३) च 'अभिज्ञानशाकुन्तल'स्य वस्तुरसचरित्रचित्रणादिविषयान् वर्णयतः।

सुधाकरमालवीयः (ई. २०११) 'अभिज्ञानशाकुन्तल'स्य भूमिकाखण्डे 'शाकुन्तल का मूल्याङ्कन' (शाकुन्तलस्य मूल्याङ्कनम्) इति उपशीर्षके नाट्यवस्तुरसवर्णनशैलीचरित्रचित्रणादिनिरूपणक्रमे संवादस्य चर्चां करोति। स 'अभिज्ञानशाकुन्तल'स्य संवादा रोचका, अनावश्यकविस्तारहीनाः, लघुवाक्येषु संरचिताः, लोकोक्तीनां प्रयोगात् प्रभावोत्पादका घटनापरिस्थित्यनुकूलाश्च सन्ति (पृ.६९) इति कथयति । तथैव 'भाषा' इत्युपशीर्षके कथयति - कालिदासस्य भाषा सरला, सरसा, मनोरमा च वर्तते। सम्पूर्णं शाकुन्तलमेतस्योदाहरणमस्ति । साधारणतया तस्य भाषायां प्रसादमाधुर्यगुणौ विलसतः (पृ ८८) इति । मालवीयो नाटकस्य भाषाशैल्याः प्राकृतभाषाप्रयोगस्य च चर्चां कुर्वन् अभिज्ञानशाकुन्तले प्रायशोऽसमस्ता, स्वाभाविकी, सरला, प्रवाहमयी, मधुरा भाषा प्रयुक्ता वर्तते। पात्रानुकूल्येन शौरसेनीमहाराष्ट्रिमागधीप्राकृतभाषाः प्रयुक्ताः सन्ति इति निष्कर्षयति।

एवमेव 'अभिज्ञानशाकुन्तल'नाटकमधिकृत्य विहितानि सर्वाणि अध्ययनानि क्रमेणात्र प्रस्तूयन्ते चेत् सुदीर्घा सूची निर्मीयते । अधुना समुपलब्धेषु अध्ययनेषु प्रायशः काव्यतत्त्वविवेचनकेन्द्रितानि सन्ति । तेषु रसालङ्कारध्वनिगुणरीत्यादीनां चर्चा लभ्यते । नाट्यतत्त्वविवेचनाधारितानि पूर्वाध्ययनानि ततो न्यूनसङ्ख्यायामुपलब्धानि सन्ति । नाट्यतत्त्वविश्लेषणाधारितेषु अध्ययनेषु च प्रायेण स्रोतकार्यावस्थार्थप्रकृत्यादिवस्तुस्वरूपनिरूणम्, चरित्रचित्रणम्, प्रकृतिचित्रणञ्चेत्यादिविषया लभ्यन्ते। संवादप्रयोगदृष्ट्या विहितानि विवेचनानि न्यूनानि सन्ति। तानि च विविधग्रन्थेषु ग्रन्थान्तर्गतशीर्षकोपशीर्षकेषु च विकीर्णतया प्रायशो हिन्दीभाषायामवस्थितानि सन्ति। अतः 'अभिज्ञानशाकुन्तल'नाटकस्य संवादविश्लेषणे केन्द्रितं संस्कृतभाषानिबद्धञ्चाध्ययनं समुपलब्धं नास्ति।

**सैद्धान्तिकाधारः**

द्वयोः पारस्पारिकी वार्ता संवादः कथ्यते। स श्रोतुर्वक्तुश्च प्रश्नोत्तरशृङ्खलया निर्मितो भाषिकसंरचनाविशेषः। रचनायाः प्रयोजनस्य च दृष्ट्या संवादो द्विप्रकारको भवति। गुरुशिष्ययोः, चिकित्सकरोगिणोः, आपणिकग्राहकयोश्च परस्परं जायमानां वार्तामिव दैनिकव्यवहारेयंकमपि विषयमवलम्ब्य जातः कयोश्चित्द्वयोर्वार्तालापः साधारणः साहित्येतरो वा संवादः। कवितानाटकोपन्यासकथादिषु प्रयुक्तः संवादः साहित्यिकः। साधारणसंवादापेक्षया साहित्यिकसंवादे परिमार्जिता अलङ्कृता च भाषा लभ्यते। साधारणसंवादे भाषासौष्ठवापेक्षया सूचनाप्रवाहे विशेषाग्रहो लभ्यते । साहित्ये प्रयुक्तः संवादश्च रचनायाः प्रकृत्या प्रयोजनेन च पृथक् पृथक् भवति। नाटकेतररचनासु संवादस्य स्थितिर्वैकल्पिकी। काव्येषु कथासु च लेखकः स्वयमेव घटनाः विचारांश्च प्रस्तोतुं शक्नोति। नाटके तु वस्तुवर्णनं चरित्रचित्रणञ्च संवादेनैव करणीयम्। अतो नाटके संवादस्य महती भूमिका दृश्यते।

नाटकमभिनेयकाव्यमस्ति । अभिनयस्य कायिकवाचिकाहार्यसात्विकाश्चत्वारः प्रकाराः सन्ति । वाचिकाभिनयो नटनटीनां कथोपकथनयोराधारितो भवति। कथावस्तुविकासश्चरित्राङ्कनञ्च तन्माध्यमेनैव जायते। नाट्यसंवादो नाटकीयकथां प्रस्तौति, तथैव रसाद्यास्वाद्यवस्तूनि विविधविचारांश्च संवहति (उपाध्याय, २०४९, पृ.७९)। नाटकस्य साफल्यमसाफल्यञ्च संवादमाश्रयते। वस्तुनेतृरसाः प्रमुखनाट्याङ्गानि संवादयोजनायामाधारितानि भवन्ति। पाश्चात्त्यनाट्यसिद्धान्ते प्रमुखनाट्याङ्गेषु परिगणितः संवादः संस्कृतनाट्यशास्त्रकारैर्नाट्याङ्गेषु उपाङ्गेषु वा परिगणितो नास्ति । तथापि तत्स्वरूप-वस्तु-नेत्र्यादिनाट्यवस्तुनिरूपणक्रमे संवादविषयिणी चर्चा अनेकशः कृता वर्तते। संस्कृतसाहित्यलक्षणशास्त्रस्यादिम आचार्यो भरतो नाट्यस्वरूपं प्रकाशयन् कथयति -

**मृदुललितपदार्थं गूढशब्दार्थहीनं**
**बुधजनसुखबोध्यं युक्तिमन्नृत्तयोग्यम्।**

**बहुरसकृतमार्गं सन्धिसन्धानयुक्तं**

**भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ।।** (नाट्यशास्त्रम्, १६/१२९) इति ।

प्रस्तुतनाट्यलक्षणे नाट्यभाषाया विशेषताश्च प्रस्तुताः सन्ति । नाटकीया भाषा कथोपकथनाधीना भवति । नाट्यभाषाया यानि वैशिष्ट्यानि तानि सर्वाणि संवादाश्रितानि भवन्ति । प्रस्तुतविवेचनानुसारेण तानि वैशिष्ट्यानि कोमलता, मधुरता, सरलता, बौद्धिकजनप्रियता च सन्ति । एतेन नाटकीयसंवादे सरलता, स्पष्टता, प्रभावोत्पादकता, स्वाभाविकता चापेक्षिता भवन्तीति आधुनिकी नाट्यमान्यता च सङ्केतिता वर्तते (उपाध्याय, २०५९, पृ.१४९) । प्रस्तुतनाट्यस्वरूपनिरूपणतः प्रस्तुतातालेखे नाट्यसंवादविश्लेषणाधाररूपेण सरलता, सङ्क्षिप्तता, कोमलता, मधुरता चेति विशेषताः सैद्धान्तिकाधाररूपेण गृहीताः सन्ति। एवमेव संस्कृतनाट्यलक्षणग्रन्थेषु नाटके वस्तुयोजनाया विकासक्रमे संवादस्य भेदोपभेदा दर्शिताः सन्ति । पूर्वं संवादस्य मञ्चीयनेपथ्यौ चेति द्वौ भेदौ भवतः । मञ्चीयसंवादोऽपि सर्वश्राव्य-नियतश्राव्याश्राव्यत्वेन त्रिविधो दर्शितोऽस्ति । यथा –

**सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च** (दशरूपकम्, १/६४) ।

उपर्युक्तेषु त्रिषु सर्वश्राव्याश्राव्यौ द्वौ संवादौ प्रकाश-स्वगतशब्दाभ्यां बोध्येते । तृतीयस्य नियतश्राव्यस्य जनान्तिकापवारितौ द्वौ भेदौ भवतः । धनञ्जयो जनान्तिकसंवादस्वरूपं यथा निरूपयति -

**त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।**

**अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्** (दशरूपकम्, १/६५-६६) ।

मञ्चीयात् द्वितीयनटाद्विमुखः कश्चिन्नटोऽन्यस्य गुप्तां वार्तां कथयति चेत् तदपवारितसंवादः कथ्यते -

**रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम्** (दशरूपकम्, १/६६) ।

तथैव रूपके आकाशभाषितत्वनाम्नः कथोपकथनस्य च प्रयोगः क्रियते इति दशरूपककारो वर्णयति –

**किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।**

**श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषितम् ।** (१/६७)

आकाशभाषितसंवादे मञ्चीयः कश्चित् द्वितीयस्यानुपस्थितावपि स (द्वितीयः) तत्रैव वर्तते, स मया सह ब्रवीति, मद्वार्तां च शृणोति इति अभिनीय भाषते चेदेष आकाशभाषितसंवादः कथ्यते ।

एते नाट्यसंवादप्रकारा आचार्यभरतप्रणीते नाट्यशास्त्रे, धनञ्जयकृते दशरूपके, कविराजविश्वनाथप्रणीते साहित्यदर्पणे च सलक्षणं प्रतिपादिताः सन्ति । प्रस्तुतालेखे दशरूपके प्रतिपादितं संवादलक्षणं विश्लेषणस्यापरसैद्धान्तिकाधारतया गृहीतं वर्तते ।

नाट्यवस्तुविकासे पात्रस्वभावप्रकाशे, नाटकीयकार्यव्यापारभावाभिव्यक्तौ च संवादस्य भूमिका महत्त्वपूर्णा दृश्यते । यदि संवादः स्वाभाविको युक्तियुक्तश्चेत् विश्वसनीयो दृश्यते । तन्माध्यमेन प्रस्तुतेषु सर्वेषु विषयेषु प्रेक्षका विश्वस्ता भवन्ति । नाट्यवस्तु विश्वासयोग्यः रुचिपूर्णश्च स्यात् तस्य कृते पात्रस्य सामाजिकार्थिक-शैक्षिक-सांस्कृतिक-सांस्कारिकस्तरस्य प्रवृत्तेश्चानुकूल्येन नाट्यसंवादसंयोजनं करणीयम् । पात्रानुकूल्येन संवादरचनाया विषये धनञ्जयः कथयति -

**देशभाषाक्रियावेशलक्षणाः स्युः प्रवृत्तयः ।**

**लोकादेवावगम्यैता यथौचित्यं प्रयोजयेत्** (दशरूपकम्, २/६३) इति ।

नाटकीयसंवादे विविधदेशीयभाषाया औचित्यपूर्णप्रयोगः करणीयः । नाट्ये यदि उच्चकुलोद्भवा राजानः, सेनापतयः, ऋषयः, देवाश्च पात्ररूपेणागताः सन्ति चेत् तेषां संवादभाषा संस्कृतं भवति । यथा -

**पाठ्यं तु संस्कृतं नृणामनीचानां कृतात्मनाम्** (दशरूपकम्, २/६४) इति ।

कुलीननारीणां संवादे संस्कृतप्राकृतयोर्मध्ये एका भाषा, निम्नवर्गीय (अकुलीन /कुलहीन) पात्राणां संवादे शौरसेन्यादिजनभाषा प्रयोक्तव्या । यथा -

**लिङ्गिनीनां महादेव्या मन्त्रिजावेश्ययोः कचित् ।।**

**स्त्रीणां तु प्राकृतं प्रायः सौरसेन्यधमेषु च** (दशरूपकम्, २/६४-६५) इति।

नीचपात्रस्य भाषा पैशाची मागधी वा भवितुं शक्नोति। यथा -

**पिशाचात्यन्तनीचादौ पैशाचं मागधं तथा** (दशरूपकम्, २/६५) इति।

नाट्यपात्रं यद्देशीयं तस्य नाट्यसंवादभाषा च तद्देशीया योजनीया। पात्रानुकूल्येन भाषाप्रयोगसन्दर्भे धनिकः पुनः प्रतिपादयति-

**यद्देशं नीचपात्रं यत्तद्देशं तस्य भाषितम् ।**

**कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः** (दशरूपकम्, २/६६) इति।

उच्चकुलोद्भवानां देवादीनां संवादे संस्कृतम्, कुलीननारीणां संवादे संस्कृतप्राकृतयोर्मध्ये एका, मध्यमवर्गीय (अकुलीन /कुलहीन) पात्राणां संवादे शौरसेनी, नीचपात्राणां मागधीपैशाच्यादिजनभाषा प्रयोक्तव्या। नाटके कुलीनपात्रो नीचकर्मनिरतश्चेत् तद्भाषाऽपि नीचपात्रस्य इव प्राकृतभाषा भवति। एतेन नाटकस्य संवादे भाषाचयनं पात्रस्य देशस्तरनाटकीयकार्यव्यापारानुकूल्येन करणीयमिति ज्ञायते। अनया रीत्या संस्कृतनाट्यशास्त्रे नाट्यसंवादभाषा पात्रानुकूला साधिता वर्तते।

एवमेव नाट्याचार्यैर्नाट्यपात्राणां स्वाभाविकचरित्रनिर्माणाय नाट्यसंवादे सम्बोधनपदप्रयोगरीतयश्च प्रस्तुताः सन्ति। तत्र यथा -

**भगवन्तो वरैर्वाच्या विद्वद्देवर्षिलिङ्गिनः ।**<br>
**विप्रामात्याग्रजाश्चार्या नटीसूत्रभृतौ मिथः ॥**<br>
**रथी सूतेन चायुष्मान्पूज्यैः शिष्यात्मजानुजाः ।**<br>
**वत्सेति तातः पूज्योऽपि सुगृहीताभिधस्तु तैः ॥**<br>
**भावोऽनुगेन सूत्री च मार्षेत्येतेन सोऽपि च ।**<br>
**देवः स्वामीति नृपतिभृ(र्भृ?)त्यैर्भट्टेति चाधमैः ।।**<br>
**आमन्त्रणीयाः पतिवज्ज्येष्ठमध्याधमैः स्त्रियः ।**<br>
**समा हलेति, प्रेष्या च हञ्जे, वेश्याऽज्जुका तथा ॥**<br>
**कुट्टिन्यम्बेत्यनुगतैः पूज्या वा जरती जनैः ।**<br>
**विदूषकेण भवती राज्ञी चेटीति शब्द्यते ।।** (दशरूपकम्, २/६७-७१) इति।

नाटकंगद्यपद्यमयस्यकाव्यस्याङ्गम्।अतस्तद्भाषाक्वचिद्गद्यमयीक्वचिद्पद्यमयीक्वचित्तूभयात्मिकाभवितुंशक्नोति।संस्कृतनाटके मिश्रभाषाप्रयोगपरम्पराबाहुल्यं विराजते। संस्कृतगद्यरचनापरम्परायां तिस्रः शैल्यः प्रयुक्ताः सन्ति। उपनिषत्सु ब्राह्मणेषु च प्रयुक्ता सरला, परिष्कृता च शैली (वैदिकगद्यम्) प्रथमा, सुवन्धुवाणभट्टादिभिः प्रयुक्ता आलङ्कारिकी शैली (साहित्यिकगद्यम्) द्वितीया, व्याकरणदर्शनकाव्यशास्त्रादिषु प्रयुक्ता सूत्रात्मिका पूर्वपक्षोत्तरपक्षप्रस्तुता भावगभीरा, तार्किकी च दार्शनिकी शैली (शास्त्रीयगद्यम्) तृतीया च (पाण्डेय, ई. १९०४, पृ.५६१) वर्तन्ते। तृतीया गद्यशैली पातञ्जलमहाभाष्यनिरुक्तादिषु प्रयुक्ता वर्तते। द्वितीया गद्यशैली कादम्बरीदशकुमारचरितशिवराजविजयादिषु प्रत्यक्षीकृता एव। प्रथमप्रकारके वैदिकगद्ये सरलसङ्क्षिप्तशब्दानां प्रयोगः, ह व उ चेति अव्ययपदबहुलता, वृत्तेरल्पता, उदाहरणबाहुल्यम्, उपमारूपकयोः कमनीयसन्निवेशश्च लभ्यते। अनया शैल्या वैदिकगद्यं विदग्धहृदयावर्जकं दृश्यते (खान, ई. २०२१, पृ. ९१)। अत्र गद्यात्मकसंवादविश्लेषणे सैद्धान्तिकाधारतया पूर्वोक्ता गद्यलेखनशैलिनिरूपकपक्षाः समाविष्टाः सन्ति। पद्यात्मकनाट्यसंवादविवेचनेषु रसालङ्काररीतिध्वन्यादीनि काव्यतत्वानि तेषां मान्यताश्च सैद्धान्तिकाधाररूपेणाङ्गीकृतानि वर्तन्ते।

प्रस्तुताध्ययने नाट्यसंवादविश्लेषणाय सैद्धान्तिकाधाररूपेण मूलतः संस्कृतनाट्यशास्त्रे प्रतिपादिता नाट्यसंवादभेदाः, पात्रानुकूलभाषाचयनाधाराः, संवादे सम्बोधनपदप्रयोगरीतयः, सरलता, कोमलता, सुन्दरता, सङ्क्षिप्तता, नाटकीयता, काव्यात्मकता चेति मापकानि निर्धारितानि सन्ति।

### अभिज्ञानशाकुन्तले संवादः

कथाख्यायिकाखण्डकाव्यमहाकाव्यादिश्रव्यकाव्येषु कविः स्वयमेव वर्ण्यविषयान् प्रस्तौति । नाटके तु नटनटीनां वाग्व्यवहारेणैव प्रस्तोतव्यं भवति। अत नाटके संवादस्य महती भूमिका दृश्यते। नाटकमभिनेयकाव्यं विद्यते। अभिनयस्य चत्वारो भेदाः प्रतिपादिताः सन्ति। तेषु वाचिक अभिनय एको वर्तते। तस्य प्रस्तुतिः संवादमाध्यमेन भवति। पाश्चात्त्यनाट्यशास्त्रे नाट्यतत्त्वेषु संवादो परिगणितोऽस्ति । संस्कृतनाट्शास्त्रे तथा न लभ्यते । किन्तु तत्र नाटकीयवस्तुविधानरीतिवर्णनक्रमे संवादविषयिणी चर्चा लभ्यते । अत्र कालिदासप्रणीतस्य 'अभिज्ञानशाकुन्तल'स्य नाटकीयसंवादः पूर्वीयनाट्यमान्यताधारेण विविधशीर्षकोपशीर्षकेषु विभज्य विविच्यते।

**मञ्चाभिनयाधारेण**

मञ्चाभिनयाधारेण संवादो मञ्चीयनेपथ्यभेदभिन्नो भवति । मञ्चीयः कश्चिद् ब्रूते चेत्तत् मञ्चीयश्चेत् मञ्चमप्रविष्टो भाषते, तद्भाषितं मञ्चीयाः श्रृण्वन्ति चेत् तादृशः संवादो नेपथ्यसंवादः कथ्यते। अभिज्ञानशाकुन्तले द्वयोरेव प्रयोगो लभ्यते। नेपथ्यसंवादो यथा -

**[नेपथ्ये] चक्रवाकवधु ! आमन्त्रयस्व सहचरम्, ननु उपस्थिता रजनी** (पृ.२२४)।

**[नेपथ्ये] एतु एतु भवान्** (पृ.४३३)।

**[नेपथ्ये] अभिधाव भो अभिधाव** (पृ.५१२) इति।

अनया रीत्या नाट्यसंवादे नाट्यशास्त्रीयनिर्देशानुसारमेव स्थाने स्थाने नेपथ्योक्तेर्निबन्धनं कृतमस्ति । संस्कृतनाट्यशास्त्रे मञ्चीयसंवादोऽपि रङ्गमञ्चस्थपात्रश्रवणाश्रवणत्वेन त्रिविधः प्रतिपादितो वर्तते । यथा – सर्वश्राव्यम्, नियतश्राव्यम्, अश्राव्यञ्चेति। अत्र 'अभिज्ञानशाकुन्तल'नाटकस्य संवादे एतेषां प्रयोगः क्रमेण यथा दर्शितो वर्तते -

**सर्वश्राव्यसंवादः**

पात्रोक्तिं यदि रङ्गमञ्चस्थानि सर्वाणि पात्राणि श्रृण्वन्ति चेत् तादृशः संवादः सर्वश्राव्यः । एतादृशं संवादं 'प्रकाशम्' इति च उच्यते । नाटके जनान्तिकम्, अपवारितम्, आकाशभाषितम्, अश्राव्यञ्चेति संवादप्रकारान्तरमेतस्य प्रयोगे कृते एतत् सङ्केतितं लभ्यते। यथा -

सेनापतिः - [जनान्तिकम्] सखे ! माधव्य ! स्थिरप्रतिज्ञो भव, अहं तावत् स्वामिनश्चित्तवृत्तिमनुवर्त्तिष्ये । [प्रकाशम्] देव प्रलपत्येष वैधेयः, ननु प्रभुरेव निदर्शनम् ... (पृ.११६)।

विदूषकः - [स्वगतम्] भवतु, नास्य प्रश्रयं वर्द्धयिष्यामि। [प्रकाशम्] भोः ! यदि सा तपस्विकन्यका अनभ्यर्थनीया; तत् किं तया दृष्ट्या ? (पृ.१२५)

राजा - [अपवार्य] हन्त ! द्वितीयमिदमाशाजननम्। [प्रकाशम्] अथ सा तत्र भवती किमाख्यस्य राजर्षेः पत्नी (कालिदासः, ई. २०१३, पृ. ३९२) ?

राजा- [आत्मगतम्] सर्वथा अर्थवान् खलु मे राजशब्दः [प्रकाशम्] तत्रभवान् कुशली कण्वः ? (पृ.३५५) इति।

प्रथमे संवादवाक्ये जनान्तिककमिति तृतीये अपवरितमिति नियतश्राव्यसंवादान्तरं सर्वश्राव्यस्य प्रयोगात् प्रकाशम् इति सङ्केतितो वर्तते । द्वितीयचतुर्थे अश्राव्यानन्तरं सर्वश्राव्यप्रयुक्तत्वात् सङ्केतितो वर्तते । साधारणावस्थायां तु संवादोऽयं सङ्केतितो नोपलभ्यते। यथा –

राजा - भद्रसेन ! भग्नोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन (पृ.११७)।

शार्ङ्गरवः- राजन् ! स्वाधीनकुशलाः सिद्धिमन्तः। स भवन्तमनामय-प्रश्नपूर्वकमिदमाह-

राजा- किमाज्ञापयति भगवान् ? (पृ.३५५) इति।

नाटके सर्वश्राव्यसंवादस्य प्रयोगः शास्त्रीयमान्यतानुकूलोऽभिनेयश्च वर्तते।

**नियतश्राव्यम्**

नाट्यसंवादोक्तिं यदि रङ्गमञ्चीयाः केचित् श्रृण्वन्ति केचिन्न शृण्वन्ति चेत् संवादोऽयं नियतश्राव्यः कथ्यते। रङ्गमञ्चस्थेषु मध्ये निश्चितजनश्रवणीयस्य संवादप्रकारस्यास्य जनान्तिकापवारितौ द्वौ भेदौ भवतः । मञ्चे बहूनामुपस्थितौ कौचित् तृतीयो न श्रृणुयादित्येवं नाटयित्वा परस्परं मन्त्रयतः । संवादप्रकारेऽस्मिन् दर्शकास्त्रिपताकाकारहस्तसङ्केतेन तयोर्वार्ता इतरेभ्यो वारिता वर्तते इति जानन्ति। कश्चिन्मुखं निवर्त्य गुप्तवार्तां श्रावयति चेदपवारितसंवादो भवति। अभिज्ञानशाकुन्तले नियतश्राव्यस्य प्रयोगो यथा विहितो वर्तते –

जनान्तिकम् –

प्रियंवदा - [जनान्तिकम्] अनसूये ! प्रेक्षस्व प्रेक्षस्व मेघवाताहतामिव ग्रीष्मे मयूरीं क्षणे क्षणे प्रत्यागतजीवितां प्रियसखीम् (पृ.१९६)।

सेनापतिः - [जनान्तिकम्] सखे ! माधव्य ! स्थिरप्रतिज्ञो भव, अहं तावत् स्वामिनश्चित्तवृत्तिमनुवर्त्तिष्ये। [प्रकाशम्] देव प्रलपत्येष वैधेयः, ननु प्रभुरेव निदर्शनम् (पृ.११६)।

चेटी - [जनान्तिकम्] आर्ये ! एतत् पत्रं प्रेषयता किं विचारितममात्येन। प्रेक्षस्व तावत् भर्तु बाष्पजलप्रवाहः संवृत्तः। अथवा ...(पृ.४९९) इति।

अपवारितम् –

विदूषकः - [अपवार्य] हुं, भूयोऽपि लङ्घित एष शकुन्तलावातेन। न जाने कथं चिकित्सितव्यो भविष्यति (पृ.४३८)।

विदूषकः - [अपवार्य] एष इदानीं भगवतः अनुकूलः गलहस्तः (पृ.१४३)।

अनेन प्रकारेण नाटके नियतश्राव्यसंवादः प्रयुक्तो वर्तते।

**अश्राव्यसंवादः**

वक्ता नाट्यसंवादं ब्रूते। अन्ये रङ्गमञ्चीयास्तन्नशृण्वन्ति। संवादोऽयमश्राव्यः। अभिज्ञानशाकुन्तले आत्मगतस्वगतेति निर्दिश्य संवादप्रकारोऽयं योजितोऽस्ति। यथा -

शकुन्तला - [ससाध्वसमात्मगतम्] हृदय ! तथा उत्तम्य इदानीं न किमपि प्रतिपद्यसे (पृ.१९०)।

शकुन्तला- [कथञ्चिदुत्थाय स्वगतम्] हृदय प्रथमं सुखोपनतं मनोरथे कालहरणं करोषि साम्प्रतमनुभव तावद् दुःखम्। [पदान्तरे प्रतिनिवृत्य प्रकाशम्] लतागृह ! ... (पृ.२२६)।

कञ्चुकी- [स्वगतम्] बहुलीकृतोऽयमर्थः तत् किं न कथ्यते । [प्रकाशम्] अस्ति भवत्योः कर्णपथमायातं शकुन्तलाप्रत्यादेशकौलीनम् (पृ.४३०) ?

राजा - [स्वगतम्] नाहमेवं रमणीयमात्मनः सेवावसरं शिथिलयिष्ये (पृ.२२०) इति।

अश्राव्यसंवादो नाटके आत्मालापेषु वार्तालापमध्ये स्मृतिरूपेण च आगतोऽस्ति । एतेन नाट्यसंवादे कौतूहलम्, नाटकीयता च आनीतमस्ति। रङ्गमञ्चीयः कश्चित् द्वितीयस्यानुपस्थितौ आकाशं विलोक्य प्रश्नोत्तरं करोति। तादृशः संवाद आकाशभाषितं कथ्यते। 'अभिज्ञानशाकुन्तल'स्य तृतीयाङ्कस्य विष्कम्भके एष संवादप्रकारः प्रयुक्तो वर्तते –

शिष्यः - [विचिन्त्य सविस्मयम्] अहो ! महाप्रभावो राजा दुष्यन्तः . . . यावदेतान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्य उपाहरामि । [परिक्रम्यावलोक्य च आकाशे] प्रियंवदे ! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीदलानि नीयन्ते ? [श्रुतिमभिनीय] किं कथयसि आतपलङ्घनाद् बलवदसुस्थशरीरा शकुन्तला तस्याः शरीरनिर्वापणाय इति ? . . . (पृ.१५३) इति।

एवमेव शकुन्तलाया तपोवनतः पतिगृहगमनाय अग्निप्रदक्षणीकरणे कण्वक्तौ च -

कण्वः - भो भो ! सन्निहितवनदेवतास्तपोवनतरवः।
पातुं न प्रथमं व्यवस्यति ... सर्वैरनुज्ञायताम् ॥

[आकाशे]

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमरीचितापः।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ (४/१२)

प्रथमे उदाहरणे कण्वस्य शिष्यः पात्रान्तरस्यानुपलब्धौ आकाशं विलोक्य अपरोपि वार्तां कुर्वन् विद्यते इव संवादं कुर्वाणो वर्तते। द्वितीये कण्वश्च तथा करोति। तेनात्र आकाशभाषितसंवादः प्रयुक्तोऽस्ति।

अनेन प्रकारेण नाट्यशास्त्रीयनिर्देशनानुसारेण 'अभिज्ञानशाकुन्तल'स्य संवादे विविधाः संवादप्रकाराः प्रयुक्ताः सन्ति। एतेषां प्रयोगेण संवादे अभिनेयता नाटकीयता च आगता वर्तते।

**आकाराधारेण संवादः**

आकारदृश्ट्यानाट्यसंवादश्चतुर्षुवर्गेषुस्थापयितुंशक्यते।यथा-सङ्क्षिप्तः,मध्यमः,दीर्घः,अतिदीर्घश्चेति।'अभिज्ञानशाकुन्तले' एतेषां प्रयोगो लभ्यते। यथा –

सङ्क्षिप्तसंवादः - 'अभिज्ञानशाकुन्तले' सङ्क्षिप्तसंवादप्रयोगाधिक्यं वर्तते। तन्निदर्शनं यथा -

उभौ - [उपागम्य] विजयस्व राजन् !
राजा - [आसनादुत्थाय] अभिवादये भवन्तौ।
उभौ - स्वस्ति भवते (इति फलान्युपहरत )
राजा - [सप्रणामं परिगृह्य] आगमनप्रयोजनं श्रोतुमिच्छामि।
उभौ - विदितो भवानिहस्थस्तपस्विनाम्। ते च भवन्तमभ्यर्थयन्ते।
राजा - किमाज्ञापयन्ति ? (पृ.१४२-४३) इति।

अत्र संवादवाक्यानि सङ्क्षिप्तानि सन्ति। तथैव

[प्रविश्य मृन्मयूरहस्ता तापसी] सर्वदमन ! प्रेक्षस्व शकुन्तलावण्यम्।
बालः - [सदृष्टिक्षेपम्] कस्मिन् सा मे अम्बा।
[उभे प्रहसतः]
प्रथमा - नामसादृश्येन उपच्छन्दितो मातृवत्सलः।
द्वितीया - अस्य मयूरस्य रमणीयतां प्रेक्षस्वेति भणितोऽसि। (पृ.५७१-७२) इति।

मध्यमसंवादः- प्रियंवदा - शक्यमिदानीं समाश्वसितुम्। अस्ति तेन राजर्षिणा सम्प्रस्थितेन आत्मनो नामाङ्कितमंगुलीयकं स्मरणीयमिति शकुन्तलाया हस्ते स्वयमेव परिधापितम्। एष एव तस्मिन् स्वाधीन उपायो भविष्यति (पृ. २४१-४५) इति।

दीर्घसंवादः- राजा- (निर्वर्ण्य आत्मगतम्) कथमियं सा कण्वदुहिता शकुन्तला ! (सविस्मयम्) अहो ! असाधुदर्शी खलु भवान् कण्वः, य इमामाश्रमधर्मे नियुङ्क्ते।
इदं किलाव्याजमनोहरं वपु-

स्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥१८॥
भवतु, पादपान्तरित एव विश्वस्तां तावदेनां पश्यामि (पृ. ४५-४७) इति।

मिश्रकेशी – किमिदानीमेव निर्वृतं करोमि, अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या देवजनन्या मुखात् यज्ञभागसमुत्सुका देवा एव तथा अनुष्ठास्यन्ति, यथा स भर्ता अचिरेण धर्मपत्नीं त्वामभिनन्दिष्यतीति। तन्न युक्तं मे विलम्बितुम्, यावदेतेन वृत्तान्तेन प्रियसखीं शकुन्तलां समाश्वासयामि। [इत्युद्भ्रान्तकेन निष्क्रान्ता] (पृ.५०४) इति।

अतिदीर्घसंवादः - [ततः प्रविशति विषण्णः विदूषकः]

विदूषकः- [निःश्वस्य] भोः ! हतोऽस्मि एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णः। अय (अयं?) मृगः, अयं वराहः, अयं शार्दूल इति मध्यन्दिननेऽपि (मध्यन्दिनेऽपि?) ग्रीष्मे विरलपादपच्छायासु वनराजिषु आहिण्ड्य पत्रसङ्करकषायविरसानि उष्णकटुकानि पीयन्ते गिरिणदीसलिलानि। अनियतवेलञ्च उष्णोष्णमांसभूयिष्ठं भुज्यते। तुरगगजानाञ्च शब्देन रात्रावपि मे नास्ति प्रकामशयितव्यम्। महत्येव प्रत्यूषे दास्याः पुत्रैः शाकुनिकलुब्धः कर्णोपघातिना वनगमनकोलाहलेन प्रतिबोधितोऽस्मि। एतावतापि मे पीडा न संवृता, यतः अयं गण्डस्य उपरि विस्फोटकः संवृत्तः। तेन हि किल अस्मासु अवहीनेषु तत्र भवता मृगानुसारिणा आश्रमपदं प्रविष्टेन मम अधन्यतया शकुन्तला नाम कापि तपस्विकन्यका दृष्टा, तां प्रेक्ष्य साम्प्रतं नगरगमनस्य कथामपि न करोति। एवमेव चिन्तयतः मे प्रभाता अक्ष्णोः रजनी, का गतिः। यावदेनं कृताचारपरिग्रहं प्रियवयस्यं प्रेक्षे। [ परिक्रम्यावलोक्य च ] एष बाणासनहस्तः हृदयनिहितप्रियजनः वनपुष्पमालाधारी इत एव आगच्छति प्रियवयस्यः। भवतु, अङ्गभङ्गविकलो भूत्वा स्थास्यामि। एवमपि नाम विश्रामं लभेय। [इति दण्डकाष्ठमवलम्ब्य स्थितः।] (पृ.१०१-५) इति।

‘अभिज्ञानशाकुन्तल’स्य संवादा विस्तारदृष्ट्या विविधतामाश्रयन्ति। अत्र प्रायेण लघुमध्यमसंवादयोः प्रयोगो लभ्यते। दीर्घा दीर्घतमाश्च संवादाः प्रायेण एकालापेषु वक्तव्यबहुलेषु च स्थलेषु प्रयुक्ता लभ्यन्ते। ते अभिनयस्य पूर्वान्वितेश्च दृष्ट्या व्याघातका न सन्ति।

**भाषावैविध्याधारेण संवादः**

संस्कृतनाट्यशास्त्रे व्यक्तेः सामाजिकबौद्धिकस्तरानुकूल्येन भाषाप्रयोगनिर्देशो लभ्यते। संवादभाषायाः स्वाभाविकतावृद्ध्यर्थम् ‘अभिज्ञानशाकुन्तल’स्य संवादेषु शास्त्रीयनिर्देशनं परिपालितमस्ति। भरतस्य नाट्यशास्त्रे अतिभाषार्यभाषा जातिभाषाजात्यन्तरीभाषा नाट्यसंवादे प्रयोज्या भवन्तीति भणितोऽस्ति। अतिभाषा देवानां भाषा वर्तते। आर्यभाषा (संस्कृतम्) राजभाषा वर्तते। जनपदनिवसतां साधारणजनानां भाषा जातिभाषा कथ्यते। जात्यन्तरी भाषा ग्राम्याणाम्, आरण्यकानाम्, पशूनाञ्च भाषा वर्तते (ना. शा., १७/२६-३०)। भरतात् परवर्तिभिर्नाट्यलक्षणकारैर्नाट्यसंवादभाषायाः प्रयोगविषये प्रतिपादितमस्ति यत् - राजासेनापतिरमात्यादीनां शिष्टपात्राणां भाषा संस्कृतं भवितव्यम्। कुलस्त्रीणां (तपस्विनी, महाराज्ञी, भट्टारिका, मन्त्रिपुत्री, राजकुमारी चेत्यादीनाम्) वेश्याजनानाञ्च भाषा संस्कृतं प्राकृतं वा, तथा च अकुलीनानां नीचानां वा पात्राणां भाषा प्राकृतं विधेयमिति। प्राकृतप्रयोगेऽपि व्यक्तेर्वर्गभेदाधारेण भाषाविभागः कृतो लभ्यते। स्त्रीणामकुलीनानां वा भाषा शौरसेनी भवति चेत् नीचकुलजानां भाषा पैशाची मागधी वा भवति। नीचपात्रस्य भाषा तद्देशीयाऽपि भवितुं शक्नोतीति। अभिज्ञानशाकुन्तले तन्निर्देशानुसारमेव भाषा प्रयुक्ता लभ्यते। यथा -

| नाटके प्रयुक्ता भाषा | | पात्रस्तरः | पात्राणि |
|---|---|---|---|
| संस्कृतम्<br>कुलीना राजसेवकाः<br>विद्वान्<br>ऋषयः, तपस्विनः | | कुलीनाः, अधिकारिणश्च | राजा (दुष्यन्तः), भद्रसेनः (दुष्यन्तस्य सेनापतिः), कञ्चुकी, सूत्रधारः |
| | | वैतालिकौ, सूतः (दुष्यन्तस्य सारथिः), मातलिः (इन्द्रस्य सारथिः) | |
| | | पुरोधाः (दुष्यन्तस्य पुरोहितः) | |
| | | ऋषिकुमारौ, वैखानसः, शिष्यः, हारीतः, शार्ङ्गरवः, शारद्वतः (कण्वशिष्याः), कण्वः (शकुन्तलायाः धर्मपिता), मारीचः, गालवः (मारीचस्य शिष्यः) | |
| प्राकृतम् | शौरसेनी<br>(गद्यभागेषु)<br>महाराष्ट्री<br>(पद्यभागेषु) | अकुलीना राजसेवकाः | माधव्यः (विदूषकः), रैवतकः (द्वौवारिकः), करभकः (राजसन्देशहरः), श्यालः (नगररक्षकः), |
| | | कुलस्त्रियः (राजस्त्रियः, ऋषिपत्न्यः, कन्यकाः, अप्सरा च) | शकुन्तला, नटी, सुव्रता, अन्तिका (तापस्यौ), गौतमी (कण्वभगिनी), अदितिः (ऋषिपत्नी), प्रियंवदा, अनसूया (तापसकन्यके), मिश्रकेशी (शकुन्तलाया मातुर्मेनकायाः सखी) |
| | | अकुलीनस्त्रियः | परभृतिका, मधुरिका (उद्यानपालिके), चतुरिका (चेटी), वेत्रवती (प्रतिहारी) |
| | मागधी | बालः | सर्वदमनः (दुष्यन्तस्य पुत्रः भरतः) |
| | | नीचाः | सूचकः, जालुकः (सैनिकौ) , धीवरः |

दुष्यन्तभद्रसेनकण्वतच्छिश्यगणसोमरातमारीचादीनां संवादे संस्कृतम्, तथा च विदूषकद्वौवारिकादीनां कुलहीनपात्राणां संवादे शौरसेनी, शकुन्तलाप्रियंवदातापसीचतुरिकासानुमत्यादिस्त्रीपात्राणाञ्च संवादे प्रायशः शौरसेनी, नीचपात्रैर्धीवरसूचकजालुकैः, बालपात्रेण सर्वदमनेन च प्रयुक्तसंवादे मागधी चेति प्राकृतं प्रयुक्तं लभ्यते।

नाट्यशास्त्रीयमान्यतानुसारमेव 'अभिज्ञानशाकुन्तल'स्य कुलीनपुरुषाः संस्कृतेन व्यवहरन्ति। यथा -

राजा - [कर्णं दत्वा] किन्नु खलु स्यात् (पृ.३९६)।

सेनापतिः - यथाज्ञापयति स्वामी (पृ.१२३)।

कण्वः - वत्से ! नेदं विस्मरिष्यामि (पृ.२९२) इति।

कुलहीनाः पुरुषाः, स्त्रियश्च शौरसेनीप्राकृतेन भाषान्ते। यथा -

**अ) अकुलीनपुरुषाः -**

विदूषकः - णं भवं ज्वेव मे अग्गदो वट्टदि (पृ.१२४)।

नागरकश्यालः - ण तस्सिं भट्टिणो महालिहलदणं त्ति कदुअ परिदेसो। एत्ति उण तक्केमि (पृ.४१४) इति।

**आ) स्त्रियः -**

शकुन्तला - [गतिभेदं रूपयित्वा] अम्मो को णु क्खु एसो पदक्कन्तो विअ मे पुणो पुणो वसणन्ते सज्जदि (पृ.२९२) ?

प्रतिहारी - देव ! पसण्णमुहा इसीओ दीसन्ति (पृ.३५०)।

गौतमी - बच्छ ! सङ्गरव ! अणुगच्छदि णो करुणपरिदेविणी सउन्तला, पच्छादेसपरुसे भत्तरि किं करेदु तवस्सिणी (पृ.३८९)।

तापसी – भद्दमुह ! न क्खु एषो इसिकुमारओ (पृ.५६५)।
बालाः, नीचाश्च मागधीप्राकृतभाषया व्यवहरन्ति। यथा –

**अ) बालः**

बालः (सर्वदमान) – मुञ्च मं मुञ्च मं अम्बाए सआसं गमिस्सं (पृ.५७६)।

**आ) नीचाः -**

सूचकः - दोसिदे शोइदे अ दाणिं भट्टा आवुत्तेण (पृ.४१५)।

जालुकः - णं भणेमि इमश्श मच्छशत्तुणो किदे (पृ.४१५)।

धीवरः - भट्टालके ! इदो अद्धं तुह्माणम्पि शुरामुल्लं होदु (पृ.४१५)।

अभिज्ञानशाकुन्तले सर्वाः स्त्रियः साधारणतया शौरसेनी प्राकृतं प्रयुञ्जते। तत्रापि गद्यात्मकसंवादेषु शौरसेन्या व्यवहरन्ति चेत् तासां गीतादिपद्यसंवादेषु महाराष्ट्री प्रयुक्ता लभ्यते। अपवादरूपेण प्रियंवदाया एको गीतिसंवादः संस्कृते वर्तते। यथा -

**प्रियंवदा - सुणाहि [संस्कृतमाश्रित्य]**
**दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।**
**अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव। (४/६)**

अनया रीत्या संस्कृतशौरसेनीमहाराष्ट्रीमागधीभाषाणां प्रयोगात् 'अभिज्ञानशाकुन्तल'स्य संवादो भाषिकवैविध्ययुक्तो वर्तते। संवादे संस्कृतप्राकृतादिभाषाचयनमपि पात्रस्तरानुकूलं वर्तते।

**संवादे नाट्योक्तिप्रयोगः**

नाट्यस्य स्वाभाविकतायै संवादेषु नाट्योक्तीनां चर्चा संस्कृतनाट्यशास्त्रे लभ्यते। नाट्ये व्यक्तिविशेषं प्रति प्रयोज्या विशेषशब्दा नाट्योक्तयः कथ्यन्ते। अभिज्ञानशाकुन्तले नाट्यशास्त्रीयमान्यतानुसारमेव सम्बोधनसूचकनाट्योक्तीनां प्रयोगो लभ्यते। दशरूपके "विप्रामात्याग्रजाश्चार्या नटीसूत्रभृतौ मिथः" (२/६७) इति उक्त्वा नाटके सूत्रधारेण नटी आर्या ! इति नट्या सूत्रधारः 'आर्य !' इति सम्बोधनस्य विधानं कृतं वर्तते। अभिज्ञानशाकुन्तले तन्निर्देशानुसारमेव नटीसूत्रधारौ परस्परं सम्बोधयतः। यथा –

| सम्बोधकः | सम्बोधितः | सम्बोधनम् | उदाहरणम् |
|---|---|---|---|
| नटी | सूत्रधारः | आर्य ! | नटी - आर्ये ! इयमहमस्मि। आज्ञापतु आर्यः को नियोगोऽनुष्ठीयतामिति। (पृ.८) |
| सूत्रधारः | नटी | आर्ये ! | सूत्रधारः - आर्ये ! कथयामि ते भूतार्थम्। (पृ. १०)<br>सूत्रधारः - आर्ये ! साधु गीतम्। (पृ.१६) |

शास्त्रीयमान्यतामनुसृत्य नाटके राज्ञा शिष्यवर्गैश्च कण्वपुरोधामारीचादयस्तपस्विनो विद्वांसश्च भगवन् ! इति भगवान् ! इति वा सम्बोधिताः सन्ति। यथा –

| सम्बोधकः | सम्बोधनम् | सम्बोधितः | उदाहरणम् |
|---|---|---|---|
| राजा | भगवान्<br>भगवन् | कण्वः | राजा - भवान् किमाज्ञापयति भगवान् (पृ.३४८)। |
| | | मारीचः | राजा - भगवन् प्रागभिप्रेतिद्धिः पश्चाद्दर्शनम् इत्यपूर्वः खलु वोऽनुग्रहः (पृ.५९८)। |
| | | पुरोधा | राजा - भगवन् प्रागेवास्माभिरेषोर्थः प्रत्यादिष्टः (पृ.३९९)। |
| शिष्यः | भगवन् | मारीचः | भगवन् अहमस्मि (पृ.६०९)। |
| शार्ङ्गरवः | भगवन् | कण्वः | भगवन् दूरमधिरूढः सविता (पृ.३१०) |

कालिदासः 'अभिज्ञानशाकुन्ततल'नाटके "रथी सूतेन आयुष्मान्" (दशरूपकम्, २/६८) इति शास्त्रीयनिर्देशनं परिपालयन् राजानं प्रति सारथेः सम्बोधने 'आयुष्मान् !' इति शब्दं प्रयुङ्क्ते। यथा - "सूतः - यथाज्ञापयत्यायुष्मान्। आयुष्मन् ! पश्य पश्य

।" (पृ. २३) मातलिः -" आयुष्मान् ! रथमारोहतु" (पृ.५२४) । राज्ञा तु 'सूत !' 'सारथे !' इति शब्दाभ्यां तन्नाम्ना च सारथिः सम्बोधितो लभ्यते । यथा - "राजा – सूत ! दूरममुना सारङ्गेण वयमाकृष्टाः ।" (पृ.२०) "सूत ! अकथितोऽपि ज्ञायत एवायमाभोगस्तपोवनस्य" (पृ. ३५) । "राजा - अये मातलिः! स्वागतं देवराजसारथेः" (पृ.५१८) । कुलस्त्रियः परस्परं 'हला !' इति नम्ना च सम्बोधयन्ति । निम्नवर्गीयास्तु नाम्ना 'सखि !' शब्देन च सम्बोधयन्ति । यथा -"प्रियंवदा - हला शकुन्तले ! इहैव मुहूर्तकं तिष्ठ ।" (पृ. ५२) "शकुन्तला - हला प्रियंवदे ! रमणीयं मन्त्रयसि ।" (पृ. ४५) "प्रियंवदा - हला अनसूये ! को नु खल्वेष दुरवगाहगम्भीराकृतिर्मधुरमालपन् प्रभुत्वदाक्षिण्यं विस्तारयति ।" (पृ. ७३) "अनसूया - हला ! (प्रियंवदा) ममापि अस्ति कौतूहलम्, तत् प्रक्षामि तावदेनम्" (पृ.७३) । "शकुन्तला - हला अनसूये ! ..." (पृ.४४) "प्रियंवदे ! प्रियं ते निवेदयामि" (पृ.५७) । "अनसूया - हला शकुन्तले ! पर्याकुला आर्या गौतमी भविष्यति, तदेहि शीघ्रमेकस्था भवामः" (पृ.९६) । "चेटी – परभृतिके ! किमेतदेकाकिनी मन्त्रयसे" (पृ.४२१) "मधुरिके ! तवापि एष कालो मदविभ्रमोद्गीतानाम्" (पृ.४२२) । "सखि ! अभणितेऽपि एतत् सम्पद्यत एव" (पृ.४२३) । ऋषिकन्यकाः शकुन्तलाप्रियंवदानसूयाः कुलस्त्रियः सन्ति । तेन तासां पारस्परिकसंबोधनमपि 'हला' इति वर्तते । तैः क्वचित् 'सखि' 'अयि' पदौ तथा च द्वयोर्मध्ये एकेन सम्बोधनपदेन सह नामपदञ्च सम्बोधने प्रयुक्तो लभ्यते । माधुरिकापरभृतिके चेट्यौ स्तः । तयोः संवादे तु मधुरिके ! परभृतिके ! इत्येवं रीत्या नामोल्लिखितमुपलभ्यते । नाट्यसंवादवाक्येषु राजानं अधिकारिणः कुलीनसेवकाश्च 'स्वामी !' 'देव !' इति निम्नवर्गीयाः सेवकाः 'भर्ता !' इति सम्बोधयन्ति । यथा -

| सम्बोधितः | सम्बोधनम् | सम्बोधकः | उदाहरणम् |
|---|---|---|---|
| राजा | स्वामी !देव ! | सेनापतिः | यदाज्ञापयति स्वामी । (पृ.१२३) |
| | भो महाराज ! भो मनस्विन् ! वयस्य | विदूषकः | भो महाराज ! (पृ.१०८) भो वयस्य किमेत्तव उपपन्नम् (पृ.४४३) भो मनस्विन्! अनेनाहं पशुमारणं मारयितुं प्राप्तः भवान् पुनरिमं स्वागतेनाभिनन्दति (पृ.५१८) । |
| | देव ! | कञ्चुकी | अन्यासक्तो देव तदवसरं प्रतिपालयामि (पृ.३३२) । |
| | | प्रतिहारी | देव !प्रसन्नमुखा तपस्विनो लक्ष्यन्ते (पृ.३५०) । |
| | | वैतालिकौ | जयति जयति देव (पृ.३२७) । |
| | | पुरोधाः | देव ! अद्भुतं खलु संवृत्तम् (पृ.३९६) । |
| | | श्यालः | तस्य दर्शनेन भर्त्रा कोऽप्यभिमतो जनः स्मृत इति ...(पृ.४१५) । |
| | भर्त्ता | सूचकः | तोषितः शोचितश्चेदानीं भर्त्ता आवुत्तेन (पृ.४१५) । |
| | | करभकः | जयतु जयतु भर्ता (पृ.१४६) |
| | | चेटी | भर्त्तः इयं चित्रगता भट्टिनी (पृ.४२९) । |
| | | द्वौवारिकः | यत् भर्ता आज्ञापयति । (पृ.१३८) यत् देव आज्ञापयति । (पृ.१४३) |

अत्र सेनापतेः, पुरोधसः, वैतालिकयोः, कञ्चुकीनः, प्रतिहार्याश्च सम्बोधने 'स्वामी !' 'देव !' इति शब्दौ श्यालस्य, द्वौवारिकस्य, करभकस्य, सूचकस्य च सम्बोधने 'भर्ता !' इति शब्दो लभ्यते । एतत् शास्त्रीय निर्देशानुसारमेव वर्तते ।

राजा दुष्यन्तो नाटके सर्वत्रैव विदूषकं माधव्यं 'सखे !' 'भो वयस्य !' 'सखे !' 'माधव्य !' वा सम्बोधयति, किन्तु शीघ्रं तपोवनाद् नगरगमनेच्छुको विदूषको यदि राजा शकुन्तलायाः पश्चाद् धावति चेत् स्वकीयं नगरगमनं शीघ्रं न भविष्यतीति विचिन्त्य राज्ञा सह शकुन्तलाविषयकवार्तालापोपक्रमे तपस्विकन्या त्वया परिणेतुमशक्या वर्तते चेत् तस्या दर्शनेन को लाभः? इति ब्रवीति । तच्छ्रुत्वा रुष्टो दुष्यन्तो विदूषकं 'धिङ् मूर्ख !' (पृ.१२५) इति सम्बोधयति । एवमेव शकुन्तलया सह मिलितुं पुनस्तपोवनगमनोपायं प्रस्तुवन् माधव्यस्तपस्विभ्यो नीवारषष्ठांशयाचनव्याजेन तत्र गच्छतु इति परामर्शं ददाति । तत् श्रुत्वा दुष्यन्तो विदूषकं 'मूर्ख !' (पृ.१३६) इति सम्बोधयति । राक्षसेभ्यो न विभेमीति विदूषकस्य वचः श्रुत्वा परिहासपूर्वकं दुष्यन्तो विदूषकं 'भो महाब्राह्मण !' (पृ.१४८) इति सम्बोधयति । एवमेव शकुन्तला प्रारम्भे दुष्यन्तं 'पौरव !' इति सम्बोधयति । यथा -" पौरव ! रक्ष

रक्ष विनयम्, इतस्ततः ऋषयः सञ्चरन्ति" (पृ.२०६) । इति ततः परिणयानन्तरं 'आर्य !' (पृ.२१४) 'आर्यपुत्र !' (पृ.२१७) इति सम्बोधयति । पञ्चमाङ्के शकुन्तलया यत्नतो गान्धर्वविवाहवृत्तान्तः स्मारितोऽपि दुष्यन्तस्तत् न स्मरति, शकुन्तलायाः कैतवाभिज्ञतां खण्डयन् परभृतवत् पटुत्वमाचरसीति तर्कमुपस्थापयति । तत् श्रुत्वा रुष्टा शकुन्तला 'अनार्य !' (पृ.३७९) इति सम्बोधयति । अनन्तरं कथयति -

**यूयमेव प्रमाणं जानीथ धर्मस्थितिञ्च लोकस्य ।**

**लज्जाविनिर्जिता जानन्ति न किमपि महिलाः ।।** (५/२६)

अत्र धर्मनिष्ठत्वसिद्धये परिग्रहास्वीकारप्रतिरोधं कुर्वन्ती शकुन्तला दुष्यन्तमुद्दिश्य 'यूयम्' इति सम्बोध्य क्रोधं प्रकटीकरोति । दुष्यन्तो गौतम्यै सामान्यतया 'आर्ये !' इति सम्बोधयति किन्तु शकुन्तलां पतिगृहं प्रापयितुं राजसदनं प्राप्तया गौतम्या परिणयं विस्मर्य शकुन्तलां त्यक्तुं न शक्नोसीति वचनात् रुष्टो दुष्यन्तः 'अयि तापसबृद्धे !' (पृ.३७६) इति सम्बोधनं करोति । पञ्चमाऽङ्कस्यांशे अङ्कावतारे सूचकजालुकौ रक्षिणौ धीवरं चौरं मत्वा गालीं ददन्तौ इत्थं सम्बोधयतः - "अरे कुम्भिलक ! पाटच्चर ! ग्रन्थिच्छेदक ! धीवर कथय कुत्र त्वया...राजकीयमङ्गुलीयकं समासादितम् (पृ.४०१) । "अरे पाटच्चर ! किं त्वमस्माभिर्वसतिं जातिञ्च पृच्छयसे" (पृ.४०५) ? गच्छ रे ग्रन्थिच्छेदक ! गच्छ (पृ.४१०) । पश्चाद् यथार्थ्यमवगम्य सख्यव्यवहारानुकूल्येन यथा सम्बोधयन्ति - "धीवर ! महत्तरः साम्प्रतमस्माकं प्रियवयस्यः संवृत्तोऽसि" (पृ.४१६) । एतेनावगम्यते नाट्यसंवादे पात्रगतमनोभावघटनावस्थित्यनुसारेण सम्बोधनपदानि प्रयुक्तानि सन्ति । तैर्नाट्यसंवादः स्वाभाविकः, विश्वसनीयश्च जातोऽस्ति ।

**छन्दप्रयोगाधारेण संवादः**

छन्दसो लयस्य वा प्रयोगाधारेण 'अभिज्ञानशाकुन्तल'स्य संवादा गद्यपद्यमिश्रत्वेन त्रिविधाः सन्ति । अत्र पात्रस्तरानुकूल्येन पद्यानि गद्यानि च प्रयुक्तानि सन्ति । राजासेनापतिकञ्चुकीसारथीनां (मातलिसूतयोर्द्वयोरेव) कुलीनानाम्, पुरोधावैतालिकानां विदुषाम्, वैखानसशिष्यकण्वमारिचादीनाम् ऋषीणाञ्च बौद्धिकपात्राणां संवादे बाहुल्येन पद्यानि प्रयुक्तानि सन्ति । मध्यमानां नीचानाञ्च पात्राणां संवादे पद्यानि न्यूनातिन्यूनानि सन्ति । विदूषकस्य एकमपि वाक्यं पद्ये नास्ति । धीवरः स्वकीयाभिव्यक्तौ केवलमेकमेव पद्यं प्रयुङ्क्ते । श्यालसूचकजालुकाः सर्वत्र गद्येनैव व्यवहरन्ति । द्वितीयाङ्के द्वौवारिको राज्ञा सह एकं पद्यमुच्चारयति (२/१७) परन्तु तस्य एकलसम्भाषणे एकमपि पद्यं नोपलभ्यते । 'अभिज्ञानशाकुन्तल'स्य संवादे २२७ पद्यानि सन्ति । तेषु अष्टौ पद्यानि स्त्रियः प्रयुञ्जते । याः क्वचिद् क्वचिद् पद्यभाषया व्यवहरन्ति ता सर्वा ऋषिपत्न्यः कन्यकाश्च सन्ति । चेट्यः सर्वत्र गद्येनैव व्यवहरन्ति । संस्कृतशौरसेनीमागधीभाषाप्रयोगे इव गद्यपद्यभाषाप्रयोगोऽपि पात्रस्य स्तराधारितो वर्तते । साहित्यिकरचनासु विशिष्टा रचना कविता मन्यते । विशिष्टप्रतिभान्विता जना एव कवितां स्रष्टुं शक्नुवन्ति । वार्तालापे तत्क्षणमेव कवितां विरच्य प्रयोगस्तु ततोऽपि प्रतिभावता एव सम्भाव्यते । तथ्यमिदं स्वीकृत्य 'अभिज्ञानशाकुन्तले' कुलीनपात्राणामृषीणाञ्च संवादे पद्यानि प्रयुक्तानि सन्ति किन्तु कुलहीन-बाल-स्त्रीपात्राणां संवादे सामान्यतया गद्यानि प्रयुक्तानि सन्ति । अतो गद्यपद्यप्रयोगगतमेतद् वैशिष्ट्यं पात्रस्य बौद्धिकस्तरानुकूलमेव दृश्यते ।

**काव्यात्मकताया आधारेण संवादः**

काव्यस्य श्रव्यदृश्यौ द्वौ भेदौ स्तः । दृश्यकाव्यान्तर्गते नाटके नाट्यतत्त्वैः सह काव्यतत्त्वानि च भवन्ति । 'अभिज्ञानशाकुन्तल'स्य संवादे शब्देषु माधुर्यम्, वाक्यविन्यासे लालित्यम्, दीर्घान्वयाभावश्च वर्तते । तत्र दीर्घसमासान्तानि पदानि न लभ्यन्ते । समासान्तपदयुक्तेषु कतिपयस्थलेषु च समासस्य कारणात् पदलालित्ये सरलतया अर्थज्ञाने च काऽपि क्षतिर्न दृश्यते । यथा -

**धर्म्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य ।**

**ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्कः ।।** (१/१३) इति ।

अत्र तपोधनानाम्, प्रतिहतविघ्नाः, समवलोक्य, मौर्वीकिणाङ्कः चेति समासान्ताः शब्दाः सन्ति । एतेषां प्रयोगादत्र 'विन्दौ

सिन्धु'रिव स्तोकेनाधिकार्थो द्योतितो वर्तते। एवमेव

**नीवाराः शुककोटरार्भकमुखभ्रष्टास्तरूणामधः**
**प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।**
**विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा**
**स्तोयाधारपथाश्च वल्कलशिखानिःष्यन्दरेखाङ्किताः॥** (१/१४) इति।

सूतेन सह प्रवृत्ते वार्तालापे दुष्यन्तस्य उक्तिरियं वर्तते । अत्र मृगमनुगच्छन् तपोवनं प्राप्तः स तपोवनं वर्णयति । पद्येऽस्मिन् शुककोटरार्भकमुखभ्रष्टाः, इङ्गुदीफलभिदः, विश्वासोपगमात्, अभिन्नगतयः, तोयाधारपथाः, वल्कलशिखानिःष्यन्दरेखाङ्किताश्चेति समासान्तेषु शब्देषु पदलालित्ये अर्थबोधे च समासान्तत्वान्न काठिन्यमापतितं वर्तते। एवमेव 'अभिज्ञानशाकुन्तल'स्य प्रायेषु समासान्तपदेषु समासस्य पदलालित्ये सारल्येनार्थबोधे च प्रतिकूलप्रभावो न दृश्यते।

नाट्यसंवादान्तर्गतवाक्यानि पदविन्यासगतमाधुर्यात् क्लिष्टत्वस्य कृत्रिमतायाश्च विरहात् स्वाभाविकसुन्दराणि सरससुबोध्यानि च सन्ति। वैदर्भीरीतेः माधुर्यगुणस्य प्राधान्यात् नाट्यसंवादाः सुकोमला हृदयाल्लादकाश्च दृश्यन्ते। यथा -

**अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।**
**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥** (१/२२) इति।

शकुन्तलायाः शरीरलावण्यवर्णनयुक्तेऽस्मिन् पद्ये सुकोमलपदानां प्रयोगो लभ्यते । भाषा च सरला, सरसा, सुखेनार्थबोधिका, सुललिता च वर्तते। शृङ्गाररसाप्लाविता इयं रचना जनमनांसि द्रवीकृत्य आह्लादातिशयं जनयति। वर्गान्त्यवर्णैः सह निषिद्धवर्णान् टठडढान् विहाय रकारणकारसहिता वर्णाः प्रयुक्ता सन्ति । रसश्च शृङ्गारो वर्तते । विश्वनाथमते चित्तद्रवीमयाह्लादपूर्णा सुकोमला सरसा, सरला, सुखेनार्थबोधिका च रचना माधुर्यगुणयुक्ता भवति । अस्य गुणस्य उत्तरोत्तरमुत्कर्षः संयोगशृङ्गारकरुणविप्रलम्भ शरृङ्गारशान्तरसेषु क्रमेण भवति । दुःश्रत्ववहान् टठडढवर्णान् विहाय मस्तके वर्गान्त्यवर्णसहितैः ककारात् भकारान्तैर्वर्णै सह रकारणकारौ च माधुर्यगुणव्यजकरचनासु भवन्ति (साहित्यदर्पणः, ७/२-३)। अतः पद्यमिदं माधुर्यगुणस्य निदर्शनमेव अस्ति। एवमेव नाट्यसंवादान्तर्गतेषु "सरसिजमनुविद्धं शैवलेनापि रम्यम्" (१/२०) "इदं किलाव्याजमनोहरं वपुस् ..." (१/१८) "अनाघ्रातं पुष्पं किसलयमलूनं कररुहैर् ..." (१/११) आदिषु अनेकस्थलेषु मायुर्यगुणगुणिता नाट्यसंवादांशा लभ्यन्ते।

'अभिज्ञानशाकुन्तल'स्य संवादे प्रसादगुणस्य च प्रयोगः स्थाने स्थाने लभ्यते। तन्निदर्शनमेकं यथा -

**अयं स ते तिष्ठति सङ्गमोत्सुको**
**विशङ्कसे भीरु! यतोऽवधीरणाम्।**
**लभेत वा प्रार्थयिता न वा श्रियं**
**श्रिया दुरापः कथमीप्सितो भवेत्॥** (३/१६) इति।

श्लोकेऽस्मिन् कठिनपदपदावलीनां दूरान्वयस्य सन्धिप्रयोगकाठिन्यस्य च अभावात् काव्यास्वादो झटित्येव जनमनसि तिष्ठति । मम्मटः श्रवणादेवार्थबोधिकासु शुष्ककाष्ठादिषु अग्निरव क्षिप्रमेव चित्तप्रसादनक्षमासु रचनासु प्रसादगुणो विलसति। अयं सर्वासु पदरचनासु सर्वेषु रसेषु भवतीति कथयति (काव्यप्रकाशः, ८/७०,७६)। 'अभिज्ञानशाकुन्तल'स्य संवादांशोऽयं सारल्यातिशयेन तीव्रभावोद्भावनया च पठनोत्तरक्षणे एव चित्ताकर्षणक्षमतां धारयति। तेनात्र प्रसादगुणो वर्तते। एवमेव नाट्यसंवादे प्रयुक्तानि "अर्थो हि कन्या परकीय एव ..." (४/२४) "क्व वयं क्व परोक्षमन्मथ ..." (२/१९) "जाने तपसो वीर्यम् ..." (३/२) "पातुं न प्रथमम् ..." (४/११) इत्यादिपद्यानि प्रसादगुणोपेतानि सन्ति। "का कथा वाणसन्धाने ..." (३/१) "मेदच्छेदकृषोदरम् ..." (२/५) इत्यादौ ओजगुणस्य स्थितिर्दृश्यते। 'अभिज्ञानशाकुन्तल'नाटकस्य संवादो माधुर्यगुणगुणितः, वैधर्वीरीतिरञ्जितः, शृङ्गाररसरसिकः, अर्थान्तरन्यासोपमादिरलक्कारछटाभिः सुशोभितश्च अस्ति। यथा -

**चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं**

**रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।**
**करौ व्याधुन्वन्त्याः पिबसि रतिसर्वस्वमधरं**
**वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ।।** (१/२५) इति ।

अत्र भ्रमरे नायकारोपात् समासोक्तिः, रहस्याख्यायीव इत्यत्र उत्प्रेक्षा, वयं हतास्त्वं कृती इत्यत्र दुष्यन्तादुपमेयादपि भ्रमरे उपमाने वैशिष्ट्यदर्शनाद् व्यतिरेकः, मधुकरः कृती वर्तते इत्यस्य कारणत्वेन श्लोकस्य चरणत्रयप्रदर्शनात् काव्यलिङ्गम्, भ्रमरो नीलकमलभ्रमाद् शकुन्तलाया नेत्रस्पर्शतीति भ्रान्तिमान्, भ्रमरस्वभाववर्णनात् स्वभावोक्तिः, श्रुत्यनुप्रासश्चेति षडलङ्कारा एकस्मिन्नेव पद्ये समाविष्टाः सन्ति । शृङ्गाररसध्वनिना सह हठादनिच्छन्त्या अपि चुम्बनं कुर्याम् इति बलवती इच्छा मम मनसि एव स्थिता वर्तते, तत् त्वया तु अयत्नेनैव साधितम् इति (आनन्दवर्धनः, २०६१, लोचनम् पृ. २०१), तत्त्वान्वेषात् वयं हता इत्यत्र दुष्यन्तस्य दुःखातिशयबोधनञ्चेति (विश्वनाथः, २०६३, पृ. २७३) व्यङ्ग्यौ वर्तेते । एवमेव नाट्यसंवादाङ्गभूतेषु पद्येषु विविधरसध्वन्यलङ्काराः स्वाभाविकतया सन्निविष्टाः सन्ति ।

'अभिज्ञानशाकुन्तल'स्य गद्यात्मकसंवादे वैदिकगद्यशैली प्रयुक्ता वर्तते । यथा - "शिष्यः - विचिन्त्य सविस्मयम् अहो ! महाप्रभावो राजा दुष्यन्तः, येन प्रविष्टमात्र एवाश्रमं तत्र भवति सारथिद्वतीये राजनि निरुपप्लवानि नः कर्माणि संवृतानि" (पृ.१५२) । इति नाट्यसंवादांशेऽस्मिन् भाषाशैली परिष्कृता, सरला, सरसा, सङ्क्षिप्ता च वर्तते । प्रसादगुणोपेता इयं शैली ब्राह्मणग्रन्थेषु उपनिषत्सु च प्रयुक्ता लभ्यते । अत्रापि सा एव शैली वर्तते । एवमेव 'अभिज्ञानशाकुन्तल'नाटकस्य गद्यात्मकसंवादे वैदिकगद्यशैल्याः सर्वा विशेषता लभ्यन्ते ।

नाट्यसंवादस्य गद्यवाक्येषु विविधसूक्तिप्रयोगात् भाषिकसौन्दर्यं चारुत्वञ्च परिवर्धितमस्ति । षष्ठाङ्के दुष्यन्तं प्रति माधव्योक्तौ सूक्तिप्रयोगचारुत्वं दृश्यते । यथा - "भवितव्यता खल्वत्र बलवती" (पृ.४४८) इति । अत्र शकुन्तावृत्तान्तं परिहासो वर्तते इति दुष्यन्तोक्तिः सत्या इति विश्वसिति । अतः सुविदितपूर्वोऽपि माधव्यो दुष्यन्तेन सह शकुन्तलाविषयकवृत्तान्तं कदाऽपि न वदति । राजा मह्यं तस्यां स्वकीयामाशक्तिं निगूहति किमिति च नेक्षते । दुष्यन्तश्च सर्वं विस्मरति । शकुन्तलावियोगो निश्चितोऽवर्तत तस्मात् तदनुकूला चेतना द्वयोर्मस्तके जाता इत्यर्थे इयं सूक्तिः प्रयुक्ता वर्तते । इयं सूक्तिः प्रकारान्तरेण "यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः" इति पञ्चतन्त्रस्य उक्तिं तथा च "नियतिः केन वार्यते ?" इति सुप्रसिद्धार्थञ्च द्योतयति । गद्यसंवादान्तर्गताः काश्चित् सूक्तयो यथा सन्ति - "कस्तावदुष्णोदकेन नवमालिकां सिञ्चति" (पृ.२४६) "सर्वः खलु कान्तमात्मानं पश्यति" (पृ.१२५) "स्नेहः पापमाशङ्कते" (पृ.३०९) "अनिर्वर्ण्यं खलु परकलत्रम्" (पृ.३५२) चेति । एतादृशैः सूक्तिसमन्वितवाक्यैर्गद्यसंवादो मञ्जुलः, पठनीयः, भावगभीरश्च जातो वर्तते ।

संवादेऽभिव्यञ्जितैः कतिपयव्यङ्ग्यैरपि संवादश्चारु वर्तते । नाटकस्य चतुर्थाङ्के पतिवियोगविक्लवां शकुन्तलां दुर्वासाशापप्रकरणं मा ब्रूहि इति अनसूयायाः कथनं समर्थयन्ती प्रियंवदा भणति – "कस्तावदुष्णोदकेन नवमालिकां सिञ्चति ?" (पृ.२४६) इति । अत्र दुर्वाससः शापवृत्तान्तश्रावणं सचिन्तायै शकुन्तलायै इतोप्यधिकपीडनमस्तीति व्यङ्ग्यो वर्तते । पञ्चमाङ्के अङ्कावतारे श्यालो विहस्य "विशुद्ध इदानीमस्य आजीवः" (पृ.४०६) इति व्यङ्ग्यं करोति । एतादृशाभिर्व्यङ्ग्योक्तिभिर्नाट्यसंवादो रमणीयो वर्तते ।

## निष्कर्षः

अभिज्ञानशाकुन्तले मञ्चीयनेपथ्यसंवादौ प्रयुक्तौ स्तः । मञ्चीयसंवादप्रकारेषु च सर्वश्राव्यनियतश्राव्याश्राव्यसंवादा औचित्यपूर्णतया प्रयुक्ताः सन्ति । नियतश्राव्यस्य जनान्तिकापवारितभेदद्वयेन सह आकाशभाषितसंवादप्रकारस्य यथोचितप्रयोगाद् नाट्यसंवादेऽभिनेयता वृद्धिङ्गता वर्तते । नाट्यसंवादे प्रायेण सङ्क्षिप्तमध्यमाकारकसंवादाः प्रयुक्ता सन्ति । क्वचिदेकालापेषु वक्तव्यबहुलस्थलेषु च प्रयुक्ता दीर्घा दीर्घतमाश्च संवादा अभिनेयतायाः पूर्वान्वितेश्च दृष्ट्या विघ्नकारका न दृश्यन्ते ।

नाट्यसंवादे पात्रस्य सामाजिकबौद्धिकस्तरानुकूल्येन भाषाः प्रयुक्ताः सन्ति। नाट्यसिद्धान्तमनुपालयन् कुलीनपात्राणां संवादे संस्कृतम्, अकुलीनपात्राणाम्, कुलस्त्रीणाञ्च संवादे प्रायेण शौरसेनी (पद्येषु) महाराष्ट्री (गद्येषु) च, कुलहीनानां प्रहरीधीवराणां बालस्य च संवादे मागधी प्रयोगान्नाट्यसंवादो भाषावैविध्ययुक्तो दृश्यते।

नाट्यशास्त्रमनुसृत्य 'अभिज्ञानशाकुन्तल'नाट्यसंवादे पात्रस्तरमनोभावघटनानुसारेण सम्बोधनसूचिका नाट्योक्तयः प्रयुक्ताः सन्ति। तत्र शास्त्रीयनिर्देशानुसारमेव भगवन् ! , राजन् !, आयुष्मान् !, आर्य ! , देव !, वयस्य !, भद्रमुख !, भर्त्ता !, भट्टारक !, हला !, सखि !, अयि !, वत्स !, आवुत्त ! आर्या !, आर्यपुत्र !, तात !, भवती !, इत्यादयः नाट्योक्तयः औचित्यपूर्णतया प्रयुक्ताः सन्ति।

गद्यपद्यभाषाप्रयोगश्च पात्रगतबौद्धिकस्तरानुकूल्येन कृतो लभ्यते। नाट्यसंवादे मध्यमनीचपात्राणि, प्रायशः स्त्रियश्च गद्येन व्यवहरन्ति। द्वौवारिकधीवरौ सकृदेव पद्यं ब्रुवाते। विदूषकनागरकश्यालौ तु पद्यमेकमपि नोच्चारयतः। २२७ पद्येषु अष्टावेव स्त्रियः प्रयुञ्जते। ताश्च सर्वा तपोवनवासिन्यः सन्ति। नाट्यसंवादे गद्यपद्यनिबन्धनं पात्रस्य बौद्धिकस्तरानुकूलं वर्तते।

काव्यात्मकताया दृष्ट्या च 'अभिज्ञानशाकुन्तल'स्य संवाद उत्कृष्टो वर्तते। नाट्यसंवादान्तर्गता पद्यशैली प्रायशो माधुर्यप्रसादगुणयुक्ता, दीर्घसमासहीना, वैदर्भीरीतिरञ्जिता, अयत्नभूतैर्रसालङ्कारध्वनिभिः स्वाभाविकतया समलङ्कृता, सरसा, सरला, परिष्कृता च वर्तते। गद्यांशेऽपि प्रसादगुणोपेता, सङ्क्षिप्ता, प्राञ्जला, परिष्कृता च वैदिकगद्यशैली प्रयुक्ता वर्तते। सा विविध सूक्तिभिर्व्यङ्ग्योक्तिभिश्च मञ्जुला, गभीरा, पठनीया च वर्तते। अत एव नाट्यसंवादो नाट्यतत्त्वैः काव्यतत्त्वैश्च समलङ्कृतो वर्तते।

## सन्दर्भसामग्रीसूची


आनन्दवर्धनः (२०६१). *ध्वन्यालोकः* (लोचनहिन्द्यनुवादभूमिकापरिशिष्टसंयुतः, गङ्गासागररायः, अनु. सम्पा.). चौखम्बा संस्कृतभवन।

उपाध्याय, केशवप्रसाद (२०६०). *नाटकको अध्ययन*. साझा प्रकाशन।

उपाध्याय, बलदेव (ई. २००८). *संस्कृत सुकवि समीक्षा*. चौखम्बा विद्याभवन।

ओझा, बाबुराम (ई. २०२२). *गलबन्दी लोकदोहोरी गीतको संवाद विश्लेषण* {Conversation Analysis Of Galbandi Folk Dohori Song}. CHINTAN-DHARA, 16(1), 30–40. https://doi.org/10.3126/cd.v16i1.48161

कालिदासः (ई. २०११). *अभिज्ञानशाकुन्तलम्* (ज्योत्स्नासरलासंस्कृतहिन्दीव्याख्योपेतम्, सुधाकरमालवीयः, व्या. का.). चौखम्बा कृष्णदास अकादमी।

कालिदासः (ई. २०१३). *अभिज्ञानशाकुन्तलम्* (विमलाचन्द्रकलासंस्कृतहिन्दीव्याख्योपेतम्, कृष्णमणित्रिपाठी, व्या. का.). चौखम्बा सुरभारती प्रकाशन।

खान, एखलाक उद्दीन और सिंह, सीमा (ई.२०२१). *संस्कृत गद्य साहित्य का विकास*. *Humanities and Development*, *16* (1-2), 91-95. DOI: https://doi.org/10.61410/had.v16i1-2.18

धनञ्जयः (ई. २०१३). *दशरूपकम्* (चन्द्रकलाहिन्दीव्याख्योपेतम्, भोलाशङ्करव्यासः, व्या. का.). चौखम्बा विद्याभवन।

पाण्डेय, श्यामशरण (ई. १९०४). *कालिदास का नाट्यकल्प*. अनुपम प्रकाशन।

भरतः (ई. १९८४). *नाट्यशास्त्रम्* द्वितीयो भागः अध्यायाः ८-१८ (अभिनवभारतीसंस्कृतव्याख्यया समुद्भाषितम्, कन्हैयालाल जोशी, सम्पा.). परिमलपब्लिकेशन्स। https://epustakalay.com/book/286283-natyasastra-volii-by-bharat-muni/#google_vignette

मम्मटः (ई. १९१७/२००८). *काव्यप्रकाशः* (भट्टवामनाचार्यविरचितबालबोधिनीटीकासमन्वितः). परिमल पब्लिकेशन्स।

विश्वनाथः (२०६३). *साहित्यदर्पणः* (सटिप्पणलक्ष्मीव्याख्याविभूषितः, आचार्यः कृष्णमोहनशास्त्री, व्या. का. सम्पा.). चौखम्बा संस्कृत संस्थान।